# Shri Oppiliappan or Akashanagarisha Suprabhatam

# શ્રી ઓપ્પિલિઅપ્પન્ સુપ્રભાતં અથવા આકાશનગરીશસુપ્રભાતમ્

## Document Information

Text title : Shri Oppiliappan or Akashanagarisha Suprabhatam

File name : AkAshanagarIshasuprabhAtam.itx

Category : vishhnu

Location : doc_vishhnu

Author : U. V. Sri Ramadesikacharyar Swamy

Transliterated by : NA

Proofread by : NA, PSA Easwaran

Description/comments : Lord of Bhumi devi, TiruviNNagarappan

Latest update : March 12, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 12, 2022

*sanskritdocuments.org*

# શ્રી ઓપ્પિલિઅપ્પન્ સુપ્રભાતં અથવા આકાશનગરીશસુપ્રભાતમ્

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચારવર્યો મે સનિધત્તામ્ સદા હૃદિ ॥

ઉદ્યત્કોટિદિવાકરેન્દુસુભગં પીતામ્બરાલઙ્કૃતં
નાનાભૂષણભૂષિતં નવઘનશ્યામં પ્રસન્નાનનમ્ ।
લાવણ્યામ્બુનિધિં નિરસ્તલવણં શ્રીશઙ્ખચક્રાઞ્ચિતં
શ્રીવૈકુણ્ઠપુરાધિપં શુભતનું ભૂમ્યાઃ પતિં સંશ્રયે ॥ ૧॥

માર્કણ્ડેયમહાતપઃ ફલતયા શ્રીવ્યોમપુર્યાં પુરા
સઞ્જાતા પરિણીય તત્પુરપતિં ત્યક્ત્વા રસં સૈન્ધવમ્ ।
ભક્તાનામભયપ્રદાનનિરતા ફુલ્લારવિન્દેક્ષણા
સેયં પુષ્યતુ મઙ્ગલાન્યનુદિનં સર્વાણિ સર્વંસહા ॥ ૨॥

કૌસલ્યાસુપ્રજા રામ પૂર્વા સન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૩॥

ઉત્તિષ્ઠોત્તિષ્ઠ સર્વેશ ઉત્તિષ્ઠ ધરણીપતે ।
ઉત્તિષ્ઠાભ્રપુરાધીશ લોકાનાં મઙ્ગલં કુરુ ॥ ૪॥

તવ સુપ્રભાતમમલાયતેક્ષણે
ભગવન્મૃકણ્ડુસુતપુત્રિ શોભને ।
કરુણામયૈસ્તવ કટાક્ષતલ્લજૈઃ
અભિરક્ષ નો ધરણિદેવિ તાવકાન્ ॥ ૫॥

માતર્મહીશ્વરિ મૃકણ્ડુકુલાવતીર્ણે
સ્વાયત્તકાન્તવિભવે સરસીરુહાક્ષિ ।
ત્વં જાગૃહિ શ્રુતિસુખસ્તુતિગીતવાદ્યૈઃ
શ્રીશ્રીનિવાસદયિતે તવ સુપ્રભાતમ્ ॥ ૬॥

પ્રાચ્યામુદેતિ દિશિ દીપશિખેવ ભાનુઃ

વિપ્રાઃ સ્વકર્મનિરતાઃ પ્રણમન્તિ સન્ધ્યામ્ ।
ઉત્તિષ્ઠ ભૂસ્તનતટદ્વયમધ્યસુપ્ત
વૈકુણ્ઠપુર્યધિપતે તવ સુપ્રભાતમ્ ॥ ૭॥

ભૃઙ્ગાઞ્ચિતાનિ મધુમન્તિ વિકસ્વરાણિ
પુષ્પાણિ પૂજયિતુમર્ચ્યમુપાહરન્તઃ ।
દ્વારાન્તિકે વિધિમુખાઃ પ્રતિપાલયન્તિ
શ્રીવ્યોમપત્તનપતે તવ સુપ્રભાતમ્ ॥ ૮॥

ગેયં ભવન્તમુપવીણયિતું પ્રવૃત્તાન્
કાસારભૂકલિવિરોધિમહચ્છઠારીન્ ।
દ્વારિ સ્થિતાનનુગૃહાણ શુભૈઃ કટાક્ષૈઃ
આકાશપત્તનપતે તવ સુપ્રભાતમ્ ॥ ૯॥

વૈકુણ્ઠનાથ ઇતિ સૂરિનુતોઽસિ શુદ્ધં
આનન્દમાલયવિમાનમુદૈરયંસ્તે ।
નિદ્રાઽપિ તે નિખિલરક્ષણચિન્તનૈવ
દાસાન્ વિલોકય વિભો તવ સુપ્રભાતમ્ ॥ ૧૦॥

ક્ષેત્રે મૃકણ્ડુસુતદિવ્યતપસ્સમૃદ્ધ્યૈ
ત્વં સન્નિધાય તુલસીવિપિનેઽવતીર્ણામ્ ।
ભૂમિં પ્રિયામનઘ યાં પરિરભ્ય શેષે
બુધ્યસ્વ ભોઃ સહ તયા તવ સુપ્રભાતમ્ ॥ ૧૧॥

ભૂદારતામુપગતો જલધેર્ધરિત્રીં
પ્રાગુદ્ધાર હિ ભવાન્ કિમુ તચ્છ્રમેણ ।
ભૂદાર એવ શયિતોઽત્ર ભુવઃ કુચાદ્રૌ
શાન્તશ્રમો નુ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૨॥

પુણ્યં તવાવતરણાત્ શ્રવણં વનં ચ
ત્યાજ્યં બભૂવ લવણં પરિણેતુમુર્વીમ્ ।
ભવ્યેક્ષણેન ભવતઃ કૃતિનો ભવેમ
સ્વાપં વિમુઞ્ચ ધરણીશ્વર સુપ્રભાતમ્ ॥ ૧૩॥

મુક્તામયો મણિમયઃ કનકસ્વરૂપો
વૈકુણ્ઠદિવ્યનગરીનિલયો નિજશ્ચ ।
સ્વામીતિ પઞ્ચવિધમેષ શઠારિસૂરિઃ

ત્વામુદ્ગૃણાતિ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૪॥

શ્રીનાથયામુનયતીન્દ્રમુખા મહાન્તઃ
અહોરાત્રપુષ્કરિણિકાવિહિતાવગાહાઃ ।
ધામાન્તિકેઽઞ્જલિભૃતઃ પ્રતિપાલયન્તિ
ત્વાં વ્યોમપત્તનપતે તવ સુપ્રભાતમ્ ॥ ૧૫॥

વેદાન્તદેશિકમણિર્ગુણરત્નસિન્ધુઃ
ભક્ત્યોદ્ગૃણન્ અઘટિતં ઘટયન્તમત્ર ।
ત્વાં સેવિતું શ્રિતજનૈઃ સહ સન્નિધત્તે
શ્રીવ્યોમપુર્યધિપતે તવ સુપ્રભાતમ્ ॥ ૧૬॥

વૈખાનસેન વિધિનાઽર્ચિતપાદપદ્મ
વૈકુણ્ઠપુર્યધિપતે વિનતાર્તિહારિન્ ।
ત્વદ્વૈશ્વરૂપ્યવિભવાનુભવોત્સુકાન્ નઃ
ધન્યાન્ વિધેહિ ધરણિપ્રિય સુપ્રભાતમ્ ॥ ૧૭॥

શ્રેયોનિદાનમિદમેવ સમસ્તજન્તોઃ
ઇત્યાશયં કરુણયા સ્વપદારવિન્દમ્ ।
નિર્દિશ્ય દર્શયસિ ભૂમિપતે કરેણ
ત્વં દક્ષિણેન ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૮॥

બધ્વાઽઞ્જલિં દુરિતકૃદ્ગતિરત્ર કેતિ
પાર્શ્વસ્થયા વસુધયા કૃપયાઽનુયુક્તઃ ।
એષેતિ દક્ષિણકરેણ પદારવિન્દં
નૈજં પ્રદર્શયસિ ભૂપ્રિય સુપ્રભાતમ્ ॥ ૧૯॥

મામાશ્રિતસ્ય સુમતેરતિભીષણોઽપિ
સંસારસાગર ઇયાન્ ભવતીતિ નૂનમ્ ।
હસ્તેન સૂચયસિ નાથ કટિસ્થિતેન
વામેન ભૂમિકમિતસ્તવ સુપ્રભાતમ્ ॥ ૨૦॥

મદ્વિપ્રયોગપરિખિન્નશઠારિસૂરિ-
સંશ્લેષદં ગગનપત્તનમેતદાસીત્ ।
હાતું તદેતદુચિતં ન કદાચનેતિ
ત્વં નિત્યવાસમિહ વાઞ્છસિ સુપ્રભાતમ્ ॥ ૨૧॥

આકાશદિવ્યનગરીશ શુભાં ત્વદીયાં
    મૂર્તિં ભજેય સતતં દયતાં ભવાન્ મે ।
પશ્ચાદ્ભવં પ્રતિભયં ન હિ કામયેતિ
    આચષ્ટ તે કલિરિપુસ્તવ સુપ્રભાતમ્ ॥ ૨૨॥

અલ્પાઽસ્થિરં વિતરતઃ ફલમીશ્વરાદીન્
    નાહં સ્મરામિ દિવિ તેઽનુભવાદિ લિપ્સે ।
ભૂવલ્લભેત્યકથયત્તવ સન્નિધાને
    ષટ્સૂક્તિકારકલિજિત્તવ સુપ્રભાતમ્ ॥ ૨૩॥

કુક્ષૌ સ્થિતિં તદનુ જન્મજરામૃતીશ્ચ
    ત્વદ્વિસ્મૃતેર્મુહુરગાં ખપુરાધિનાથ ।
ઇત્યભ્યધાન્નિજદશાં ભવતઃ સમીપે
    ભૂમ્યાઃ પતે કલિરિપુસ્તવ સુપ્રભાતમ્ ॥ ૨૪॥

ત્વં શ્રીશ્ચ દિવ્યભુવને સમયં વિધાય
    પ્રાપ્તૌ પૃથગ્વનમિદં જગતો વિભૂત્યૈ ।
વ્યાજો મૃકણ્ડુતનયસ્ય તપોઽવતારે
    તસ્યાશ્ચ તે ચ વસુધાધવ સુપ્રભાતમ્ ॥ ૨૫॥

નિર્નિદ્રપદ્મસુભગં નયનામ્બુજં તે
    વૈકુણ્ઠસીમનિ નિષેવ્ય વિયત્પુરેઽસ્મિન્ ।
નિત્યાઃ સુષુપ્તિસુષમામનુભૂય તૃપ્તાઃ
    નિદ્રાં વિમુઞ્ચ ધરણીશ્વર સુપ્રભાતમ્ ॥ ૨૬॥

ભાગ્યેન કેનચન કિઙ્કરતાધિરાજ્યં
    ભક્તા જના ભુવિ ભવત્કૃપયા પ્રપન્નાઃ ।
ભોગૈઃ સમર્ચયિતુમીશ ભવત્પ્રતીક્ષાઃ
    ભૂમીશ જાગૃહિ વિભો તવ સુપ્રભાતમ્ ॥ ૨૭॥

રૂપેષુ પઞ્ચસુ પરં તવ દિવ્યમાદ્યં
    વ્યૂહસ્તથા વિભવસંજ્ઞમથાન્તરં ચ ।
અર્ચેતિ તેષુ ચરમે કૃતિનો રમન્તે
    યે તાન્ વિલોકય મહીશ્વર સુપ્રભાતમ્ ॥ ૨૮॥

સૂરીશ્વરૈર્બહુમતે શઠકોપમુખ્યૈઃ
    અષ્ટોત્તરે સતિ શતે ભગવત્સ્થલાનામ્ ।

સૌલભ્યમભ્યધિકમત્ર પુરે વિતન્વન્
    વીક્ષસ્વ નઃ ક્ષિતિપતે તવ સુપ્રભાતમ્ ॥ ૨૯॥

ત્વત્સેવયા તવ ગુણાવલિકીર્તનેન
    ત્વદ્ભુક્તભોગરસતસ્ત્વદનન્યભક્ત્યા ।
કાલં સમસ્તમિહ નઃ સફલં ચિકીર્ષૂન્
    પ્રીત્યાઽવલોકય મહીશ્વર સુપ્રભાતમ્ ॥ ૩૦॥

અપ્રાકૃતં શ્રુતિશતોક્તમકાલકાલ્યં
    આનન્દસાન્દ્રમનઘં પરમં પદં તત્ ।
ત્યક્ત્વાઽઽગતસ્ત્વમવનેરવનાય દેવ
    સર્વંસહેશ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૩૧॥

શારીરકાધિકરણદ્રમિડપ્રબન્ધ-
    દુગ્ધાબ્ધિનિર્મથનજૈર્ગુણદિવ્યરત્નૈઃ ।
વેદાન્તદેશિકગુરુગ્રથિતાં સુમાલાં
    કણ્ઠે કુરુ ક્ષિતિપતે તવ સુપ્રભાતમ્ ॥ ૩૨॥

એલાદિસંસ્કૃતસુગન્ધિનદીજલાઢ્યૈઃ
    હૈમૈર્ઘટૈર્નિજશિરોવિધૃતૈર્લસન્તઃ ।
ત્વત્કિઙ્કરાસ્ત્વદભિષેકકૃતે સમેતાઃ
    તાનાદિશાવનિપતે તવ સુપ્રભાતમ્ ॥ ૩૩॥

કાલોચિતા ગુણનિધે વિવિધાઃ સપર્યાઃ
    ભક્ત્વા યથાઽધિકરણં પ્રવિધાતુકામાઃ ।
ઉત્થાનમત્ર ભવતઃ પ્રતિપાલયન્તિ
    વૈકુણ્ઠપુર્યધિપતે તવ સુપ્રભાતમ્ ॥ ૩૪॥

ત્વત્તોઽધિકા પુરુષકારતયા ધરિત્રી
    તુલ્યા ત્વયા હ ફલતાફલદાતૃતાભ્યામ્ ।
ઉક્તાકૃતિત્રયવિશિષ્ટગૃહિણ્યુપેત
    વૈકુણ્ઠપુર્યધિપતે તવ સુપ્રભાતમ્॥ ૩૫॥

આકાશપત્તનપતે તવ સુપ્રભાતં
    એતજ્જનાઃ પ્રતિદિનં ભવતસ્સમીપે ।
પ્રાતઃ પઠન્તુ સકલં શુભમાપ્નુવન્તુ
    ત્વત્પાદપદ્મમધુપાનરતા ભવન્તુ ॥ ૩૬॥

ઇતિ વૈકુણ્ઠવાસિ શ્રી યુ વે રામદેશિકાચાર્ય સ્વામિ વિરચિતં
શ્રી ઓપ્પિલિઅપ્પન્ સુપ્રભાતં અથવા આકાશનગરીશસુપ્રભાતં સમ્પૂર્ણમ્ ॥

શ્રી ભૂમિદેવીસમેત શ્રી ઓપ્પિલિઅપ્પન્ તિરુવડિગલે આકાશનગરીશપાદપદ્મૌ શરણમ્ ।

---

*Shri Oppiliappan or Akashanagarisha Suprabhatam*
pdf was typeset on March 12, 2022

Please send corrections to *sanskrit@cheerful.com*